# Shri Nrisimha Hridayam

# શ્રીનૃસિંહહૃદયમ્

## Document Information

Text title : Shri Nrisimha Hridayam

File name : nRRisiMhahRRidayam.itx

Category : vishhnu, dashAvatAra, hRidaya, vishnu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 4, 2025

*sanskritdocuments.org*

# Shri Nrisimha Hridayam

# શ્રીનૃસિંહહૃદયમ્

શ્રીગણેશાય નમઃ ।
બ્રહ્મૌવાચ-
અથાતઃ સમ્પ્રવક્ષ્યામિ નૃસિંહહૃદયોત્તમમ્ ॥

સારં સર્વમન્ત્રાણાં જ્ઞાનદં મોક્ષદં શુભમ્ ॥ ૧॥

નૃસિંહમન્ત્રરાજાદ્યાસ્તારતમ્યફલપ્રદાઃ ॥

હૃદયં સર્વદેવાનાં સારભૂતં ભયાપહમ્ ॥ ૨॥

ૐ અસ્ય શ્રીનૃસિંહહૃદયસ્તોત્રમન્ત્રસ્ય ।
કપિલમહાવિષ્ણુઋષિઃ । અતિજગતીચ્છન્દઃ ।
શ્રીલક્ષ્મીનૃસિંહો મહાવિષ્ણુર્દેવતા । આદ્યાજગન્મૂલપ્રકૃતિઃ શક્તિઃ ।
મહાપુરુષ આદ્યં બીજમ્ । બુદ્ધિઃ દ્વિતીયા શક્તિઃ । તદુપાધિકપ્રત્યગાત્મા દ્વિતીયં બીજમ્ ।
અમૃતપૂરિણી શિરસિ । મધ્યવર્તિની મૂલાધારાદારભ્ય બ્રહ્મરન્ધ્રપર્યન્તં સુષુમ્નાસરસ્વતી કુણ્ડલા દેવિ તૃતીયા શક્તિઃ । તત્પુરુષ ચરણ ઉદાનવાયુસ્તૃતીયમ્બીજમ્ ।
સ્વાહાન્ત્યપરતશ્ચતુર્થીશક્તિઃ ।
ક્ષ્રૌમિત્યપરં ચતુર્થં બીજમ્ ॥ શ્રીલક્ષ્મીનૃસિંહકૃપાપ્રસાદપ્રીત્યર્થં જપે વિનિયોગઃ ।)
અથ કરન્યાસઃ ।
ૐ ક્ષ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ ક્ષ્રીં તર્જનીભ્યાં નમઃ ।
ૐ ક્ષ્રૂં મધ્યમાભ્યાં નમઃ ।
ૐ ક્ષ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ ક્ષ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ ક્ષ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
અથ હૃદયાદિન્યાસઃ ।
ૐ ક્ષ્રાં હૃદયાય નમઃ ।
ૐ ક્ષ્રીં શિરસે સ્વાહા ।

ૐ ક્ષં શિખાય વષટ્ ।
ૐ ક્ષૈં કવચાય હુમ્ ।
ૐ ક્ષ્રૌં નેત્રત્રયાય વૌષટ્ ।
ૐ ક્ષ્રઃ અસ્ત્રાય ફટ્ ।
અથ ધ્યાનમ્ ।
ક્રોધાદ્દિગ્ભૂતકર્ણસ્ફુરદનલનિભચક્ષુરઙ્ગારઘોરઃ
પ્રોદ્યદ્ભૂત્ભૃકુટિસ્ફુરદનિલચલત્ પ્રોલ્લસલલ્લોળજિહ્વઃ ।
સમ્ભ્રાતોજૃમ્ભપુટનટનલિનોદ્ભ્રાન્તભૂભૃત્સહસ્રો
ગર્જન્વજ્રોગ્રદંષ્ટ્રાવદનમભિવહત્ પાતુ માં નારસિંહઃ ॥ ૧॥

ધ્યાનં કૃત્વા તતો ધ્યાત્વા હૃદયં પૂજયેત્સુધીઃ ॥

અષ્ટોત્તરશતાવૃત્ત્યા પુરશ્ચર્યાં તતશ્ચરેત્ ॥ ૨॥

મન્ત્રાઙ્ગન્યાસઃ ।
ૐ ક્ષ્રાં સહસ્રાક્ષાય વિશ્વરૂપધારિણે સહસ્રબાહવે સહસ્રાયુધધરાય વિશ્વરૂપધરનારસિંહાય સ્વાહા । બ્રહ્મરન્ધ્રાય નમઃ ।
નમઃ ।
ૐ ક્ષ્રીં સહસ્રાક્ષાય જ્વાલાવિજૃમ્ભિતનારસિંહાય સ્વાહા ભ્રૂમધ્યાય નમઃ ।
ૐ ક્ષ્રૂં મહાપ્રભાય વિકટનારસિંહાય સ્વાહા કણ્ઠોપકણ્ઠાય નમઃ ।
ૐ ક્ષ્રૈં મહાધ્વનિધ્વસ્તજગદ્ભયાય નારસિંહાય સ્વાહા અનાહતચક્રાય
ૐ ક્ષ્રૌં પ્રદીપ્તચક્રબાલનયનનારસિંહાય સ્વાહા નાભિનાલાય નમઃ !
ૐ ક્ષ્રઃ સહસ્રાક્ષાય વિગતકલ્મષમૂર્તયે વિક્રમપાવનાય નારસિંહાય સ્વાહા સ્વાધિષ્ઠાય નમઃ ।
ૐ ક્ષ્રાં ક્ષ્રીં ક્ષ્રૂં ક્ષ્રૈં ક્ષ્રૌં ક્ષ્રઃ સહસ્રાક્ષાય જ્વાલામાલિને સહસ્રનખવજ્રદંષ્ટ્રાકરાલવદનાય નારસિંહાય સ્વાહા મૂલાધારાય નમઃ ।
ષ્ભિઃ સુદર્શનં મન્ત્રં સહસ્રાકૃતિતેજસમ્ ।
સૂર્યકોટિપ્રતીકાશં અગ્નિજ્વાલાસમપ્રભમ્ ॥ ૩॥

અથાતઃ સમ્પ્રવક્ષ્યામિ નારસિંહં સ્મરન્બુધઃ ।
ૐ શ્રીનારસિંહસ્ય સકલસુરાસુરપતેઃ સર્વમન્ત્રાધારસ્ય ।
સર્વ મન્ત્રનાથસ્ય સર્વ મન્ત્રાર્ચિતસ્ય સર્વમન્ત્રપૂજિતસ્ય સર્વમન્ત્રશરીરસ્ય ।
સર્વામરવૈરિવિદારણસ્ય । પ્રપન્નજનસંયુતસાધનસ્ય ભક્તવત્સલસ્ય સંસારાર્ણવદુર્ગામલસ્ત્રસનસ્ય સર્વાર્તિહરસ્ય સર્વવિઘ્નહરસ્ય । સર્વપાપહરસ્ય સર્વાભિભૂતવરપ્રદાનસ્ય । સર્વદુઃખનાશનસ્ય સર્વ સુખપ્રાપ્યસ્ય સર્વેશ્વરસ્ય ભગવતો મહાનારસિંહમહાનારસિંહસ્ય ॥

હૃદયમહાસ્તોત્રમન્ત્રં આવર્તયિષ્યામ્યાવર્તયિષ્યામિ ।
ૐ ક્ષ્રૌં ૐ પ્રણવરૂપાય મસ્તકે ।
ૐ ક્ષ્રૌં ૐ સત્વરૂપાય લલાટે ।
ૐ ક્ષ્રૌં ૐ મન્ત્રરૂપાય કર્ણયોઃ ।
ૐ ક્ષ્રૌં ૐ ધ્યાનરૂપાય નેત્રયોઃ ।
ૐ ક્ષ્રૌં ૐ ભદ્રરૂપાય કણ્ઠે ।
ૐ ક્ષ્રૌં ૐ સ્થૂલરૂપાય બાહ્વોઃ ।
ૐ ક્ષ્રૌં ૐ સૂક્ષ્મરૂપાય હૃદયે ।
ૐ ક્ષ્રૌં ૐ નિત્યરૂપાય ઉદરે ।
ૐ ક્ષ્રૌં ૐ નિરઞ્જનરૂપાય નાભૌ ।
ૐ ક્ષ્રૌં ૐ કર્તૃત્વરૂપાય પાર્શ્વયોઃ ।
ૐ ક્ષ્રૌં ૐ પરમેષ્ટિરૂપાય લિઙ્ગે ।
ૐ ક્ષ્રૌં ૐ કારણરૂપાય મૂલાધારે ।
ૐ ક્ષ્રૌં ૐ મહાકારણરૂપાય જાન્વોઃ ।
ૐ ક્ષ્રૌં ૐ કાર્યરૂપાય જઙ્ઘયોઃ ।
ૐ ક્ષ્રૌં ૐ સમરૂપાય ગુલ્ફયોઃ ।
ૐ ક્ષ્રૌં ૐ વિષ્ણુરૂપાય પાદયોઃ ।
ૐ ક્ષ્રૌં ૐ સર્વેશ્વરનૃસિંહરૂપાય સર્વાઙ્ગેષુ ।
પાતાલ લિઙ્ગેભ્યઃ હું ફટ્ ।
આકાશ આસુરેભ્યઃ હું ફટ્ ।
મન્ત્રરૂપેભ્યઃ હું ફટ્ ।
મન્ત્રજ્યોતિભ્યઃ હું ફટ્ ।
અસહાયમાં રક્ષ રક્ષ ભગવન્ નૃસિંહરૂપિન્ વિષ્ણો સર્વપાપેભ્યઃ સર્વપાપભયેભ્યઃ સર્વ પાપભયોપસર્ગેભ્યઃ ૐ હ્રીં ક્ષ્રૌં ઐં ૐ હું ફટ્ સ્વાહા । ૐ નમો ભગવતે હું ફટ્ સ્વાહા ।
નૃસિંહ ભુવિક્રીડ નૃસિંહ ભુવિદ્રાવય ભુવિદ્રાવય સર્વમન્ત્રાણિ સર્વયન્ત્રાણિ હન હન ભઞ્જ ભઞ્જ ઉચ્ચાટય ઉચ્ચાટય હું ફટ્ સ્વાહા ।
ૐ નૃસિંહાય ઉત્તમાઙ્ગભક્ષણાય હું ફટ્ સ્વાહા ।
રક્ષામન્ત્રસ્ય દેવસ્ય પઠિતવ્યં સમાહિતઃ ।
શત્રુનાશમવાપ્નોતિ સર્વત્ર વિજયીભવેત્ ॥ ૧॥

અથાતઃ સમ્પ્રવક્ષ્યામિ દિશાબન્ધનમુત્તમમ્ ।
નારસિંહં વપુશ્રેષ્ઠં દેવાનામપિ દુર્લભમ્ ॥ ૨॥

ॐ ક્ષ્રૌં ॐ મત્સ્યરૂપાય નારસિંહાય ॐ ક્ષ્રૌં ॐ લાં પૂર્વદિશં બન્ધયામિ હું ફટ્ સ્વાહા ।
ॐ ક્ષ્રૌં ॐ કૂર્મરૂપાય નારસિંહાય ॐ ક્ષ્રૌં ॐ હાં આગ્નેયીન્દિશં બન્ધયામિ હું ફટ્ સ્વાહા ।
ॐ ક્ષ્રૌં ॐ વરાહરૂપાય નારસિંહાય ॐ ક્ષ્રૌં ॐ ષાં યામ્યાન્દિશં બન્ધયામિ હું ફટ્ સ્વાહા ।
ॐ ક્ષ્રૌં ॐ નૃસિંહરૂપાય નારસિંહાય ॐ ક્ષ્રૌં ॐ નૈઋતીદિશં બન્ધયામિ હું ફટ્ સ્વાહા ।
ॐ ક્ષ્રૌં ॐ વામનરૂપાય નારસિંહાય ॐ ક્ષ્રૌં ॐ વાં વારૂણીદિશં બન્ધયામિ હું ફટ્ સ્વાહા ।
ॐ ક્ષ્રૌં ॐ પરશુરામરૂપાય નારસિંહાય ॐ ક્ષ્રૌં ॐ યાં વાયવીદિશં બન્ધયામિ હું ફટ્ સ્વાહા ।
ॐ ક્ષ્રૌં ॐ રામચન્દ્રરૂપાય નારસિંહાય ॐ ક્ષ્રૌં ॐ સાં કૌબેરીદિશં બન્ધયામિ હું ફટ્ સ્વાહા ।
ॐ ક્ષ્રૌં ॐ કૃષ્ણરૂપાય નારસિંહાય ॐ ક્ષ્રૌં ॐ શાં ઈશાનીદિશં બન્ધયામિ હું ફટ્ સ્વાહા ।
ॐ ક્ષ્રૌં ॐ બૌદ્ધરૂપાય નારસિંહાય ॐ ક્ષ્રૌં ॐ આં ઊર્ધ્વાદિશં બન્ધયામિ હું ફટ્ સ્વાહા ।
ॐ ક્ષ્રૌં ॐ કલ્કિરૂપાય નારસિંહાય ॐ ક્ષ્રૌં ॐ ક્લૌં અધરાયદિશં બન્ધયામિ હું ફટ્ સ્વાહા ।
ॐ લાં હ્રાં ષાં રાં વાં યાં સાં શાં આં ક્લૌં ॐ હું ફટ્ સ્વાહા ।
એવં દશદિશાં રક્ષાં મન્ત્રરાજં જપેત્સુધીઃ ।
સર્વાન્ કામાનવાપ્નોતિ વિષ્ણુમાયાં પ્રસીદતિ ।
ॐ ક્ષ્રૌં ॐ મુખે । ॐ ક્ષ્રૌં ॐ હૃદયે ।
ॐ શ્રીં ॐ નાભૌ । ॐ હ્રીં ॐ ગુહ્યે ।
ॐ ક્લીં ॐ મૂલાધારે । ॐ ક્લીં ॐ પાદયોઃ ।
ॐ હ્રીં ॐ પૃષ્ઠે । ॐ શ્રીં ॐ પાર્શ્વયોઃ ।
ॐ ઐં ॐ કરયોઃ । ॐ ક્ષ્રૌં ॐ સર્વાઙ્ગે વ્યાપકં ન્યસેત્ ઇતિ મન્ત્રાઙ્ગન્યાસઃ ।
અથ હૃદયમન્ત્રઃ । ॐ હયગ્રીવાય નમઃ ।

ॐ નમો ભગવતે ચક્રાસનસ્થાય શ્રીનૃસિંહાય ક્રોધમૂર્તે નૃસિંહ પુરુષપ્રધાનધર્મતો વિકટનિર્મોચન નૃસિંહ કાલપુરુષ કાલાન્તક વિશ્વેશ્વર વિશ્વવિડમ્બેન વિશ્વનિષ્ઠ વિશ્વચૈતન્ય ચિત્સદાભાસ કાલાધ્વાતીત નિશાતીત ઉદયાસ્તમયરહિત પરમહંસ પરમકારુણિક નૃસિંહહૃદયચતુર્દલનિવિષ્ટ ચૈતન્યાત્મન્ એકાત્મન્ ચતુરાત્મન્ પઞ્ચાત્મન્ દ્વાદશાત્મન્ ષોડષાત્મન્ ચર્તુર્વિંશત્યાત્મન્ પઞ્ચવિંશત્યાત્મન્ ષટ્ત્રિંશત્યાત્મન્ સપ્તવિંશત્યાત્મન્ શતસહસ્રમૂર્તે એહિ એહિ ભગવન્નારસિંહ મમ હૃદયે પ્રવેશય પ્રવેશય । સર્વાન્ આકર્ષય આકર્ષય । મમ સાન્નિધ્યં કુરુ કુરુ । ॐ રૌં નમઃ હું ફટ્ સ્વાહા ॥ ૧॥

ॐ ઐં હ્રીં ક્લીં શ્રીં ક્રીં ક્લાં ધ્યૌં નમઃ ।
ॐ ખટ્પટ્ છિન્ધિ છિન્ધિ ભિધિં ભિધિં હન્ હન્ રિપૂન્ વિષ્ણો સ્વાહા ॥ ૨॥

ॐ ક્ષ્રૌં નમઃ નમસ્તસ્મૈ નૃસિંહરૂપિણે હૃષિકેશ નમોનમઃ ।
ॐ ક્ષ્રૌં ॐ મહાઘોરાય ઉગ્રનારસિંહાય હ્રીં હું ફટ્ સ્વાહા ।
મધ્યરાત્રેવિશેષેણ રિપુસઙ્કુટમસ્તકે ।
પઠિતવ્યં મહામન્ત્રં દેવાનામપિદુર્લભમ્ ॥ ૧॥

એકવિંશતિવારં ચ પઠેત્તદિતિનિશ્ચયઃ ।
કારાગ્રહગતં ઘોરં બન્ધાદ્રાજા વિમોચયેત્ ॥ ૨॥

રાજદર્શનવેલાયાં પઠિતવ્યં ત્રિવારતઃ ।
સરાજં વશમાનિત્વા પ્રકૃતિં ચ સભાજયમ્ ॥ ૩॥

ઇદં નૃસિંહહૃદયં દેવદેવાધિદૈવતમ્ ।
સર્વસ્વં ચ મયાખ્યાતં તવભક્તઃ સદાનઘ ॥ ૪॥

બ્રાહ્મણાન્ ભોજયેન્નિત્યં દશકં દ્વાદશં તથા ।
પૂજયેન્મન્ત્રરાજં ચ કુલમાર્ગેણ સંયુતમ્ ॥ ૫॥

તત્ સમીપં પઠેન્નિત્યં નૃસિંહપ્રીતિમાપ્નુયાત્ ॥ ૬॥

ઇતિ શ્રી બ્રહ્માણ્ડપુરાણે બ્રહ્માપ્રહ્લાદસંવાદે ઉત્તરખણ્ડે શ્રીનૃસિંહચરિત્રે શ્રીનૃસિંહહૃદયં સમ્પૂર્ણમ્ ।
શ્રીકૃષ્ણાર્પણમસ્તુ । શ્રીમદ્દિવ્યલક્ષ્મીનૃસિંહાર્પણમસ્તુ ।

Proofread by M K Barman

*Shri Nrisimha Hridayam*
pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*